শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে অষ্টচৎৱারিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে অষ্টচৎৱারিংশং দশকম্ ॥

## যমলার্জুনভঞ্জনৱর্ণনম্

মুদা সুরৌঘৈস্ত্বমুদারসম্মদৈ -
রুদীর্য দামোদর ইত্যভিষ্টুতঃ।
মৃদূদরঃ স্বৈরমুলূখলে লগ -
ন্নদূরতো দ্বৌ ককুভাৱুদৈক্ষথাঃ ॥ **48.1** ॥

কুবেরসূনুর্নলকূবরাভিধঃ
পরো মণিগ্রীৱ ইতি প্রথাং গতঃ।
মহেশসেৱাধিগতশ্রিযোন্মদৌ
চিরং কিল ৎৱদ্বিমুখাৱখেলতাম্ ॥ **48.2** ॥

সুরাপগাযাং কিল তৌ মদোৎকটৌ
সুরাপগাযদ্বহুযৌৱতাৱৃতৌ।
ৱিৱাসসৌ কেলিপরৌ স নারদো
ভৱৎপদৈকপ্রৱণো নিরৈক্ষত ॥ **48.3** ॥

ভিযা প্রিযালোকমুপাত্তৱাসসং
পুরো নিরীক্ষ্যাপি মদান্ধচেতসৌ।
ইমৌ ভৱদ্ভক্ত্যুপশান্তিসিদ্ধযে
মুনির্জগৌ শান্তিমৃতে কুতঃ সুখম্ ॥ **48.4** ॥

যুৱামৱাপ্তৌ ককুভাত্মতাং চিরং
হরিং নিরীক্ষ্যাথ পদং স্বমাপ্নুতম্।

ইতীরিতৌ তৌ ভৱদীক্ষণস্পৃহাং
গতৌ ৱ্রজান্তে ককুভৌ বভূৱতুঃ॥ **48.5** ॥

অতন্দ্রমিন্দ্রদ্রুযুগং তথাৱিধং
সমেযুষা মন্থরগামিনা ৎৱযা।
তিরাযিতোলূখলরোধনির্ধুতৌ
চিরায জীর্ণৌ পরিপাতিতৌ তরূ॥ **48.6** ॥

অভাজি শাখিদ্ৱিতযং যদা ৎৱযা
তদৈৱ তদ্গর্ভতলান্নিরেযুষা।
মহাৎৱিষা যক্ষযুগেন তৎক্ষণা -
দভাজি গোৱিন্দ ভৱানপি স্তৱৈঃ॥ **48.7** ॥

ইহান্যভক্তোঽপি সমেষ্যতি ক্রমাৎ
ভৱন্তমেতৌ খলু রুদ্রসেৱকৌ।
মুনিপ্রসাদাদ্ভৱদঙ্ঘ্রিমাগতৌ
গতৌ ৱৃণানৌ খলু ভক্তিমুত্তমাম্॥ **48.8** ॥

ততস্তরূদ্দারণদারুণারৱ -
প্রকম্পিসম্পাতিনি গোপমণ্ডলে।
ৱিলজ্জিতৎৱজ্জননীমুখেক্ষিণা
ৱ্যমোক্ষি নন্দেন ভৱান্ ৱিমোক্ষদঃ॥ **48.9** ॥

মহীরুহোর্মধ্যগতো বতার্ভকো
হরেঃ প্রভাৱাদপরিক্ষতোঽধুনা।
ইতি ব্রুৱাণৈর্গমিতো গৃহং ভৱান্
মরুৎপুরাধীশ্ৱর পাহি মাং গদাৎ॥ **48.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে অষ্টচৎৱারিংশং দশকং সমাপ্তম্॥